# ॥ वाल्मीकि रामायण॥

## २ अयोध्याकाण्ड

### अध्याय ११०

सा त्वेवमुक्ता वैदेही अनसूयानसूयया ।
प्रतिपूज्य वचो मन्दं प्रवक्तुमुपचक्रमे ॥ १॥

नैतदाश्चर्यमार्याया यन्मां त्वमनुभाषसे ।
विदितं तु ममाप्येतद्यथा नार्याः पतिर्गुरुः ॥ २॥

यद्यप्येष भवेद्भर्ता ममार्ये वृत्तवर्जितः ।
अद्वैधमुपवर्तव्यस्तथाप्येष मया भवेत् ॥ ३॥

किं पुनर्यो गुणश्लाघ्यः सानुक्रोशो जितेन्द्रियः ।
स्थिरानुरागो धर्मात्मा मातृवर्ती पितृप्रियः ॥ ४॥

यां वृत्तिं वर्तते रामः कौसल्यायां महाबलः ।
तामेव नृपनारीणामन्यासाम् अपि वर्तते ॥ ५॥

सकृद्दृष्टास्वपि स्त्रीषु नृपेण नृपवत्सलः ।
मातृवद्वर्तते वीरो मानमुत्सृज्य धर्मवित् ॥ ६॥

आगच्छन्त्याश्च विजनं वनमेवं भयावहम् ।
समाहितं हि मे श्वश्र्वा हृदये यत्स्थितं मम ॥ ७॥

प्राणिप्रदानकाले च यत्पुरा त्वग्निसंनिधौ ।
अनुशिष्टा जनन्यास्मि वाक्यं तदपि मे धृतम् ॥ ८॥

नवीकृतं तु तत्सर्वं वाक्यैस्ते धर्मचारिणि ।
पतिशुश्रूषणान्नार्यास्तपो नान्यद्विधीयते ॥ ९॥

सावित्री पतिशुश्रूषां कृत्वा स्वर्गे महीयते ।
तथा वृत्तिश्च याता त्वं पतिशुश्रूषया दिवम् ॥ १०॥

वरिष्ठा सर्वनारीणामेषा च दिवि देवता ।
रोहिणी च विना चन्द्रं मुहूर्तमपि दृश्यते ॥ ११॥

एवंविधाश्च प्रवराः स्त्रियो भर्तृदृढव्रताः ।
देवलोके महीयन्ते पुण्येन स्वेन कर्मणा ॥ १२॥

ततोऽनसूया संहृष्टा श्रुत्वोक्तं सीतया वचः ।
शिरस्याघ्राय चोवाच मैथिलीं हर्षयन्त्युत ॥ १३॥

नियमैर्विविधैराप्तं तपो हि महदस्ति मे ।
तत्संश्रित्य बलं सीते छन्दये त्वां शुचिव्रते ॥ १४॥

उपपन्नं च युक्तं च वचनं तव मैथिलि ।
प्रीता चास्म्युचितं किं ते करवाणि ब्रवीहि मे ।
कृतमित्यब्रवीत्सीता तपोबलसमन्विताम् ॥ १५॥

सा त्वेवमुक्ता धर्मज्ञा तया प्रीततराभवत् ।
सफलं च प्रहर्षं ते हन्त सीते करोम्यहम् ॥ १६॥

इदं दिव्यं वरं माल्यं वस्त्रमाभरणानि च ।
अङ्गरागं च वैदेहि महार्हमनुलेपनम् ॥ १७॥

मया दत्तमिदं सीते तव गात्राणि शोभयेत् ।
अनुरूपमसङ्क्लिष्टं नित्यमेव भविष्यति ॥ १८॥

अङ्गरागेण दिव्येन लिप्ताङ्गी जनकात्मजे ।
शोभयिष्यामि भर्तारं यथा श्रीर्विष्णुमव्ययम् ॥ १९॥

सा वस्त्रमङ्गरागं च भूषणानि स्रजस्तथा ।
मैथिली प्रतिजग्राह प्रीतिदानमनुत्तमम् ॥ २०॥

प्रतिगृह्य च तत्सीता प्रीतिदानं यशस्विनी ।
श्लिष्टाञ्जलिपुटा धीरा समुपास्त तपोधनाम् ॥ २१॥

तथा सीतामुपासीनामनसूया दृढव्रता ।
वचनं प्रष्टुमारेभे कथां कां चिदनुप्रियाम् ॥ २२॥

स्वयंवरे किल प्राप्ता त्वमनेन यशस्विना ।
राघवेणेति मे सीते कथा श्रुतिमुपागता ॥ २३॥

तां कथां श्रोतुमिच्छामि विस्तरेण च मैथिलि ।
यथानुभूतं कार्त्स्न्येन तन्मे त्वं वक्तुमर्हसि ॥ २४॥

एवमुक्ता तु सा सीता तां ततो धर्मचारिणीम् ।
श्रूयतामिति चोक्त्वा वै कथयामास तां कथाम् ॥ २५॥

मिथिलाधिपतिर्वीरो जनको नाम धर्मवित् ।
क्षत्रधर्मण्यभिरतो न्यायतः शास्ति मेदिनीम् ॥ २६ ॥

तस्य लाङ्गलहस्तस्य कर्षतः क्षेत्रमण्डलम् ।
अहं किलोत्थिता भित्त्वा जगतीं नृपतेः सुता ॥ २७ ॥

स मां दृष्ट्वा नरपतिर्मुष्टिविक्षेपतत्परः ।
पांशु गुण्ठित सर्वाङ्गीं विस्मितो जनकोऽभवत् ॥ २८ ॥

अनपत्येन च स्नेहादङ्कमारोप्य च स्वयम् ।
ममेयं तनयेत्युक्त्वा स्नेहो मयि निपातितः ॥ २९ ॥

अन्तरिक्षे च वागुक्ताप्रतिमा मानुषी किल ।
एवमेतन्नरपते धर्मेण तनया तव ॥ ३० ॥

ततः प्रहृष्टो धर्मात्मा पिता मे मिथिलाधिपः ।
अवाप्तो विपुलामृद्धिं मामवाप्य नराधिपः ॥ ३१ ॥

दत्त्वा चास्मीष्टवद्देव्यै ज्येष्ठायै पुण्यकर्मणा ।
तया सम्भाविता चास्मि स्निग्धया मातृसौहृदात् ॥ ३२ ॥

पतिसंयोगसुलभं वयो दृष्ट्वा तु मे पिता ।
चिन्तामभ्यगमद्दीनो वित्तनाशादिवाधनः ॥ ३३ ॥

सदृशाच्चापकृष्टाच्च लोके कन्यापिता जनात् ।
प्रधर्षणामवाप्नोति शक्रेणापि समो भुवि ॥ ३४ ॥

तां धर्षणामदूरस्थां सन्दृश्यात्मनि पार्थिवः ।
चिन्तार्णवगतः पारं नाससादाप्लवो यथ ॥ ३५ ॥

अयोनिजां हि मां ज्ञात्वा नाध्यगच्छत्स चिन्तयन् ।
सदृशं चानुरूपं च महीपालः पतिं मम ॥ ३६ ॥

तस्य बुद्धिरियं जाता चिन्तयानस्य सन्ततम् ।
स्वयं वरं तनूजायाः करिष्यामीति धीमतः ॥ ३७ ॥

महायज्ञे तदा तस्य वरुणेन महात्मना ।
दत्तं धनुर्वरं प्रीत्या तूणी चाक्षय्य सायकौ ॥ ३८ ॥

असञ्चाल्यं मनुष्यैश्च यत्नेनापि च गौरवात् ।
तन्न शक्ता नमयितुं स्वप्नेष्वपि नराधिपाः ॥ ३९ ॥

तद्धनुः प्राप्य मे पित्रा व्याहृतं सत्यवादिना ।
समवाये नरेन्द्राणां पूर्वमामन्त्र्य पार्थिवान् ॥ ४० ॥

इदं च धनुरुद्यम्य सज्यं यः कुरुते नरः ।
तस्य मे दुहिता भार्या भविष्यति न संशयः ॥ ४१ ॥

तच्च दृष्ट्वा धनुःश्रेष्ठं गौरवाद्गिरिसंनिभम् ।
अभिवाद्य नृपा जग्मुरशक्तास्तस्य तोलने ॥ ४२ ॥

सुदीर्घस्य तु कालस्य राघवोऽयं महाद्युतिः ।
विश्वामित्रेण सहितो यज्ञं द्रष्टुं समागतः ॥ ४३ ॥

लक्ष्मणेन सह भ्रात्रा रामः सत्यपराक्रमः ।
विश्वामित्रस्तु धर्मात्मा मम पित्रा सुपूजितः ॥ ४४ ॥

प्रोवाच पितरं तत्र राघवो रामलक्ष्मणौ ।
सुतौ दशरथस्येमौ धनुर्दर्शनकाङ्क्षिणौ ।
इत्युक्तस्तेन विप्रेण तद्धनुः समुपानयत् ॥ ४५ ॥

निमेषान्तरमात्रेण तदानम्य स वीर्यवान् ।
ज्यां समारोप्य झटिति पूरयामास वीर्यवान् ॥ ४६ ॥

तेन पूरयता वेगान्मध्ये भग्नं द्विधा धनुः ।
तस्य शब्दोऽभवद्भीमः पतितस्याशनेरिव ॥ ४७ ॥

ततोऽहं तत्र रामाय पित्रा सत्याभिसन्धिना ।
उद्यता दातुमुद्यम्य जलभाजनमुत्तमम् ॥ ४८ ॥

दीयमानां न तु तदा प्रतिजग्राह राघवः ।
अविज्ञाय पितुश्छन्दमयोध्याधिपतेः प्रभोः ॥ ४९ ॥

ततः श्वशुरमामन्त्र्य वृद्धं दशरथं नृपम् ।
मम पित्रा अहं दत्ता रामाय विदितात्मने ॥ ५० ॥

मम चैवानुजा साध्वी ऊर्मिला प्रियदर्शना ।
भार्यार्थे लक्ष्मणस्यापि दत्ता पित्रा मम स्वयम् ॥ ५१ ॥

एवं दत्तास्मि रामाय तदा तस्मिन्स्वयं वरे ।
अनुरक्ता च धर्मेण पतिं वीर्यवतां वरम् ॥ ५२ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made

publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com